National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2019; 1(22): 20-21
© 2019 NJHSR
www.sanskritarticle.com

**हेमलता**
शोधछात्रा,जैनदर्शनविभागः,
श्रीलालबहादुरशास्त्री राष्ट्रिय संस्कृत-
विद्यापीठम्,नवदेहली-110016

**Correspondence:**
**हेमलता**
शोधछात्रा,जैनदर्शनविभागः,
श्रीलालबहादुरशास्त्री राष्ट्रिय संस्कृत-
विद्यापीठम्,नवदेहली-110016

# जैनागमेषु मङ्गलशब्दस्य विवेचनम्

**हेमलता**

भारतीयशब्दशास्त्रमपि अति गूढगम्भीरोऽस्ति। अत्र अल्प-अल्प शब्दानां गागरे दीर्घ अर्थानां महासागराः परिपूर्णाः सन्ति। विद्वज्जनाः स्व सम्पूर्ण जीवने एतेषां शब्दानां गूढ गम्भीरार्थं ज्ञातुं प्रयत्नं कुर्वन्ति। मंगलं शब्दोऽपि इत्थमेव अल्प शब्दः,परञ्च अत्यन्त सारगर्भितशब्दोऽस्ति। मंगलस्यार्थः अत्यधिकव्यापकं गूढमपि चास्ति।

प्राचीनकालात् अद्यपर्यन्तं निरन्तरमेतस्य शब्दस्य प्रयोगः भारतीयजनजीवने दृश्यते। प्राकृतसंस्कृतभाषायां प्राचीनग्रन्थेषु एतस्य शब्दस्य अति प्रयोगाः प्राप्नुवन्ति, वर्तमान अपि एतस्य शब्दस्य प्रयोगः अल्पः न दृश्यते। मंगलं इति मंगलं शब्दे सम्पूर्ण भारतीय संस्कृतेः आत्मा वसति।

यथा-

1-आगामिदिवसे ममगृहस्य मंगलप्रवेशः भवतां प्रार्थयन्तु।

2-नववर्षः भवतां कृते मंगलं भवेत्।

3-भवतां यात्र मंगलमयी भवेत्।

4-शास्त्रसमारम्भे मंगलाचरणम् अवश्यमेव करणीयम्।

जैनपरम्परायां मंगलस्य अतीवमहत्त्वं विद्यते। तत्र सर्वकार्येषु प्रथमं णमोकारमहामन्त्रस्य उच्चारणं सर्वमंगलेषु प्रथममंगलं स्वीकृतमस्ति। अत्र जैनपरम्परायां मंगलविषयोपरि शास्त्रचर्चा विद्यते? इति चर्चा प्रासिङ्गकी विद्यते।

**मंगलशब्दस्यार्थः-**

जैनग्रन्थेषु मंगलं शब्दस्यार्थः तस्य व्युत्पतिपूर्वकं कथितम्। आप्तपरीक्षासोपज्ञटीकायां आचार्यविद्यानन्दिमहोदयाः उक्तवन्तः-ततो मंगं सुखं समुत्पद्यत इति तद्गुणस्तोत्रं मंगलम्, ‘मंगं लातीति मंगलम्’ मंगलम् इति व्युत्पतेः। ‘मलं गालयतीति मंगलम् इति वा, मलस्याधर्मलक्षणस्य परम्परया तेन प्रध्वंसनात्। केवलं सत्पात्रदान- जिनेन्द्रार्चनादिकमप्येवं मंगलमिति न तद् गुणस्तोत्रमेव मंगलमिति नियमः सिद्धयति।[1]

**मंगलस्य पर्यायवाचिनः-**

तिलोयपणत्तिग्रन्थे यतिवृषभाचार्याः उक्तवन्तः-

**फ्पुण्णं पूदपवित्ता पसम्थसिवभद्दखेमकल्याण।**
**सुहसोक्खादी सव्वे णिदिट्ठा मंगलस्स पज्जाया।।**[2]

अर्थात् पुण्यं, पुतं, पवित्रं, प्रशस्तं, शिवं, भद्रं, क्षेमं, कल्याणं, शुभं, सौख्यमित्यादयः शब्दाः मंगलस्य पर्यायवाचिनः सन्ति।

धवला ग्रन्थे अपि मंगलस्य अनेके पर्यायवाचिनः शब्दाः सन्ति। यथा-मंगलं, पुण्यं, पुतं, पवित्रं, प्रशस्तं, शिवं,कल्याणं, भद्रं, सैाक्ख्यमित्येवमादीनि।[3]

षट्खण्डागमटीकायां विषयेऽस्मिन् शंङ्का - समाधानञ्चास्ति-

**शंङ्का** - एकार्थ प्ररूपणं किमर्थमिति चेत्?

**समाधानम्**-“यतो मंगलार्थोऽनेकशब्दाभिधेयस्ततोऽनेकेषु शास्त्रेष्वनेकाभिधानै- मङ्गलार्थः प्रयुक्तश्चितनाचार्यैः सोऽव्यामोहेन शिष्यैः सुखेनावगम्यते इत्येकार्थः उच्यते। यद्येकशब्देन न जानाति ततोऽन्येनापि शब्देन ज्ञापयितव्यः इति वचनाद्वा।”[4]

**मंगलस्य भेदाः-**

मंगलस्य अनेके भेदाः सन्ति। उक्तञ्च धवलाग्रन्थे- कतिविधं मंगलम्?मंगलसामान्यतदेकविधं, मुख्यामुख्यभेदतो द्विविधम् सम्यग्दर्शनज्ञानचारित्रभेदात् त्रिविधं मंगलं, धर्मसिद्धसाध्वर्हद् भेदाच्चतुर्विधं, ज्ञानदर्शनत्रिगुप्तिभेदात् पञ्चविधं, 'णमो जिणाणं' इत्यादिनानेकविधं वा।[5] मंगलस्य भेदः अनेकदृश्टैः कथितुं शक्यते।

यथा-

(क)प्रथम दृश्टया मंगलं यत् पापरूपीमलं नाशयति, उत्तमसुखञ्च प्रदानं करोति तदेव मंगलमस्ति।

(ख)द्वितीयदृष्टया मंगलस्य भेदः जैनसेनाचार्यनुसारेण- 'तत्र मुख्य मंगलं कथ्यते-आदौ मध्यऽवसाने च मंगलं भाषितं बुधैः। तज्जिनेन्द्रगुणस्तोत्रं तदविघ्नप्रसिद्धये।। अमुख्यमंगलं कथ्यते-

**"सिद्धत्थ पुण्णकुंभो वंदणमाला य पुंडरं छतं।**
**सेदो वण्णो आदस्सणाय कण्णा य जतस्सो।।"**[6]

अर्थात् मंगलस्य द्वौ भेदौ स्तः- मुख्यामुख्यमंगलञ्च। ग्रन्थादौ मध्यान्ते इष्टदेवं नमस्कारः क्रियते। तत् मुख्यमङ्गलमस्ति, पीतसर्षपः च पूर्णकलशः, वन्दनमाला, छात्रः, श्वेतवर्णः, दर्पणः, उत्तमकुलस्य अश्वः, बालकन्या च अमुख्यमङ्गलानि सन्ति।

(ग) धवलायामपि मंगलस्य द्वौ भेदौ स्तः- निबद्धानिबद्धमंगलञ्च।

**'तच्च मंगलं दुविहं णिबद्धमणिबद्धमिदि।'**[7]

**मंगलस्य फलम्-**

जैनग्रन्थेषु मंगलस्य फलविषये सामग्रीम् उपलभ्यते। जैनदर्शने मंगलस्य फलं द्विविधं अस्ति-

(क)अभ्युदयरूपम्

(ख)निःश्रेयसरूपञ्च।

एते लौकिकफलं, अलौकिकफलमपि कथितं शक्यते। अलौकिकफलस्य एक नाम पारमाथिक फलमपि अस्ति। विविध विघ्नानां कष्टानां च निवारणं सति सांसारिक सुख-सम्पति स्वर्गादिन् च प्राप्नोति।

मंगलस्य अभ्युदयरूपां लौकिकफलतस्ति, परमपदं च मोक्षं मोक्षमार्गं च प्राप्नोति, मंगलस्य निःश्रेयस रूपम् अलौकिकं पारमाथिरोकरूपञ्च फलम् अस्ति।

यथा-

**'मङ्गलं फलं देहिंतो कय अभ्युदय णिस्से यस सुहाइत्तं।'**[8]

आप्तपरीक्षायामपि उक्तञ्च-

कस्मात्पुनः परमेष्ठिनः स्तोत्रं शास्त्रदौ शास्त्रकाराः प्राहुरित्यभिधीयते-

**'श्रेयोमार्गस्य संसिद्धिः प्रसादात्परमेष्ठिनः।**
**इत्याहुस्तद्गुणस्तोत्रं शास्त्रदौ मुनिपङ्गवाः।।'**[9]

जैनकविनां हिंद्यामपि कथितम्-

**'धरत करत संसार सुख धरम करत निर्वाण।'**

अथवा

**'भुक्ति-मुक्ति दातारं, चौबीसो जिनराजवर।।'**[10]

**मांङ्गलस्य प्रयोजनम्-**

जैनाचार्यानुसारं मंगलस्य अनेकप्रयोजनानि सन्ति। उक्तञ्च आप्तपरीक्षास्वोपज्ञटीकायां-'शिष्टाचारपरिपालनार्थम्, नास्तिकतापरिहारार्थम्, निर्विघ्नतः शास्त्रपरिसमास्यर्थं च परमेष्ठिगुणस्तोत्रमित्यन्येत्र तेऽपि तदेव तथेति नियमयितुमसमर्था एवत्र तपश्चरणादेरपि तथा त्व प्रसिद्वेः।'[11]

अतः अनेन प्रकारेण मंगलस्य मुख्यपञ्च प्रयोजनानि निम्नलिखितानुसारेण सन्ति-

1-शिष्टाचार परिपालनार्थम्।

2-नास्तिकता परिहारार्थम्।

3-निर्विघ्न शास्त्रसमास्यर्थम्।

4-पुण्य प्रास्यर्थम्।

5-कृतज्ञता ज्ञापनार्थम्।

**महत्वपूर्णबिन्दवः-**

मंगलविषये जैनाचार्याः शास्त्रदि शुभकार्याणां प्रारम्भे मंगलाचरणमनिवार्यं कथ्यते। एतस्मिन् प्रसंङ्गे पंचास्तिकाय तात्पर्यवृतिटीकायाम् आचार्यजयसेनैः अतीव उत्तमरीत्या शंङ्का समाधानं क्रियते।

**शंङ्का -**

'शास्त्रं मंगलममंगलं वा? मंगलं चेतदा मंगलस्य मंगलं किं प्रयोजनम्, यद्यमंगलं तर्हि तेन शास्त्रेण किं प्रयोजनम्?

**समाधानम्-**

आचार्य परिहारमाहुः- भक्त्यर्थं मंगलस्यापि मंगलं क्रियते। तथा चोक्तम्- प्रदीपेनाचार्ययेदर्कमुदकेन महोदधिम्। वागीश्वरीं तथा वाग्भिर्मंगलनैव मंगलम्।।'[12]

एवं प्रकारेण स्पष्टमस्ति यत् 'मंगलं' अत्यधिकमहत्वपूर्णः, व्यापकगूढगम्भीरविषयोचास्ति। जैनग्रन्थेषु एतस्मिन् विषये विस्तरेण एव सूक्ष्मरूपेण प्रयोगः क्रियते। किन्तु अत्र मया मन्त्र संक्षिप्तरूपेण प्रस्तुतं कृतम्।

**सन्दर्भ ग्रन्थ :-**


1.आप्तपरीक्षासोपज्ञटीका,आचार्यविद्यानन्दिः,कारिका-2,अनुच्छेद-11,पृष्ठ-12,13

2.तिलोयपणति-1/8

3.धवला 1/1,1,1/31/10

4.षट्खण्डागमज्ञानमतीमाताद्वाराटीका,भाग-1,खण्ड-1,प्रथमाधिकार,पृष्ठ-49

5.धवला-1/1,1,1/39,3(जै-सि-कोश भाग-3,पृष्ठ-252)

6.आचार्यजयसेन,पंचास्तिकायतात्पर्यवृतिटीका-1/5/10

7.धवला-1/1,1,1/41/5(जैनेन्द्रसिद्धान्तकोश,भाग-3,पृष्ठ-252)

8.धवला-1,1,1

9.आप्तपरीक्षास्वोपज्ञटीका,कारिका-2,अनुच्छेद-1,पृष्ठ-2

10.धानतरायकृत चौबीसीपूजा

11.आप्तपरीक्षास्वपज्ञटीका,अनुच्छेद-14,पृष्ठ-14

12.पञ्चास्तिकायतात्पर्यवृतिः-1/6/8